सुराजकः,पुं, सुष्ठु राजते इति । राज+ण्वुल् ।) भृङ्गराजः । इति शब्दमाला ॥

सुराजा, [ न् ] पुं, ( सुष्ठु पूजितो राजा । "न पूजनात् ।" ५।४।६९ । इति न टच् ।) शोभनो राजा । इति मुग्धबोधव्याकरणम् ॥ ( सुष्ठु राजा यस्य । सुन्दरनृपतियुक्ते देशादौ, त्रि । यथा,—

"सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र
राजवान् ॥"
इत्यमरः । २ । १३ ॥ )

सुराजीवी, [न्] पुं,सुरया जीवतीति । जीव+ णिनिः । ) शौण्डिकः । यथा,—

"कल्यपालः सुराजीवी शौण्डिको मण्डहारकः
वारिवासः पानवणिक् ध्वजो ध्वज्यासुतीबलः ॥"
इति हेमचन्द्रः ॥

(यथा याज्ञवल्क्यः । १ । १६४ ।
"चैलधावसुराजीविसहोपपतिवेश्मनाम् ॥")

सुरापः, ( त्रि, सुरां पिबतीति । पा+कः । ) सुरापानकर्त्ता । यथा,—

"ब्रह्महा जायते यक्ष्मी सुरापः श्यावदन्तकः ।
सुवर्णहारी कुनखी दुश्चर्म्मा गुरुतल्पगः ॥"
इति प्रायश्चित्तविवेकः ॥

सुरापगा, स्त्री, ( सुराणां आपगा । ) गङ्गा । इति जटाधरः ॥ ( यथा, किराते । ५ । ४० ।

"इह सनियमयोः सुरापगायाः-
मुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

सुरापाणाः,पुं, भूम्नि,(सुरा पानं येषाम् । "पानं देशे ।" ८।४।९ इति णत्वम् ।) पूर्व्वदेशस्थाः । यथा । सुरापाणाः प्राच्याः । इति संक्षिप्तसार-टीकायां गोयीचन्द्रः ॥

सुरापा(णं)नं,क्ली, (सुरायाः पानम् । "वा भाव-करणयोः ।" ८ । ४ । १० । इति विभाषया णत्वम् ।) मद्यपानम् । यथा,—

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥"
इति प्रायश्चित्तविवेकः ॥

अवदंशः । इति शब्दरत्नावली ॥

सुराभागः, पुं, (सुराया भागः ।) सुराया अग्र-भागः । इति शब्दचन्द्रिका ॥

सुरामण्डः, पुं, (सुराया मण्डः ।) सुराया अग्र-भागः । तत्पर्य्यायः । कारोत्तरः २ । इत्यमरः । २ । १० । ४३ ॥ कारोत्तमः ३ । इति तट्टीका ॥ क्वालोत्तरः ४ सुराभागः ५ । इति शब्दचन्द्रिका ॥

सुरारिः, पुं, (सुराणां अरिः ।) असुरः । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ८ ।

"प्रसीद विश्राम्यतु वीर वज्रं
शरैर्म्मदीयैः कतमः सुरारिः ।
विभेतु मोघीकृतबाहुवीर्य्यः
स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥")

सुरारिहन्ता, [ऋ] पुं, ( सुरारीणां हन्ता । ) विष्णुः । यथा,—

मैत्राद्यपादे स्वपितीह विष्णु-
र्व्वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
इति तिथ्यादितत्त्वम् ।

सुरार्हं, क्ली, (सुरान् अर्हतीति । अर्ह+अण् ।) हरिचन्दनम् । इति राजनिर्घण्टः ॥ स्वर्णम् । इति केचित् ॥

सुरालयः,पुं, (सुराणां आलयः ।) सुमेरुः । इत्यमरः । १ । १ । ५२ ॥ स्वर्गः । यथा गारुडे ।

"गङ्गां येऽत्रावगाहन्ते विधिना च नराधिप ।
चतुर्युगसहस्रं ते न पतन्ति सुरालयात् ॥"
इति तिथ्यादितत्त्वम् ॥

(देवमन्दिरम् । यथा, भागवते ।७।१५। ४९ ।
"पूर्त्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥"
सुराया आलयः ।) सुरानिलयश्च ॥

सुराष्ट्रः, पुं, ( शोभनं राष्ट्रं यस्य । ) देशविशेषः । सुरत् इति ख्यातः । स तु भारतवर्षस्य प्रतीच्यां दिशि वर्त्तते । इति सौराष्ट्रिकशब्द-टीकायां भरतः ॥(यथा महाभारते ।३।८८।१९।

"सुराष्ट्रेष्वपि वक्ष्यामि पुण्यान्यायतनानि च॥"
श्रीरामचन्द्रस्य परिवारविशेषः । स तु श्रीराम-यन्त्रे पद्मदलमध्यतः पूज्यः । यथा, अगस्त्य-संहितायाम् ।

"धृष्टं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम् ।
अकोपं धर्म्मपालाख्यं सुमन्त्रं दलमध्यतः ॥"
इति तिथ्यादितत्त्वम् ॥

सुराष्ट्रजं,क्ली, (सुराष्ट्रे जायते इति । जन्+डः। तुवरिका । इत्यमरः ।२।४।१३१॥ अस्य पर्य्यायो यथा,—

"सौराष्ट्री तुवरी काङ्क्षी मृतालकसुराष्ट्रजे ।
आढ़की चापि साख्याता मृत्स्ना च सुर-
मृत्तिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सुराष्ट्रजः, पुं, ( सुराष्ट्रे जायते इति । जन्+ डः । ) कृष्णमुद्गः । इति राजनिर्घण्टः ॥ विष-भेदः । इति शब्दचन्द्रिका ॥ तद्देशजाते, त्रि ॥

सुराष्ट्रजा, स्त्री, (सुराष्ट्रे जायते इति । जन्+ डः । टाप् । ) तुवरी । इति राजनिर्घण्टः ॥ (तुवरीशब्देऽस्या विशेषो विज्ञेयः ॥ )

सुराह्वः, पुं, (सुरस्य आह्वा आह्वा यस्य ।) देव-दारु । इति शब्दरत्नावली ॥ ( क्वचित् क्ली । अस्य पर्य्यायो यथा,—

"सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥"
इति वैद्यकरत्नमालायाम् ॥)

हरिद्रुश्च । मरुवकः । इति राजनिर्घण्टः ॥

सुरि, [ रै ] त्रि, ( सु शोभनं रा धनं यस्य । ) शोभनधनवत् । इति मुग्धबोधव्याकरणम् ॥

सुरुङ्गः, पुं, शोभाञ्जनः । इति शब्दमाला ॥

सुरुङ्गा, स्त्री. सुरङ्गा । सीँध इति सुरङ्ग इति च भाषा । तत्पर्य्यायः । सन्धिला २ सन्धिः ३ । इति जटाधरः ॥ ( यथा, महाभारते । १ । १४९ । ११ ।

"ज्ञात्वा तु तद्गृहं सर्व्वमादीप्तं पाण्डुनन्दनाः ।
सुरुङ्गां विविशुस्तूर्णं मात्रा सार्द्धमरिन्दमाः ॥"

सुरुङ्गाहिः, पुं, ( सुरुङ्गायामहिरिव ।) चौर-विशेषः । यथा,—

"कुजम्भिलः सुरङ्गाहिरथचौरः सुरङ्गयुक् ।"
इति शब्दरत्नावली ॥

सुरूपं, क्ली, (सु शोभनं रूपमस्य ।)तूलम् । इति राजनिर्घण्टः ॥

सुरूपः, त्रि, ( सु सुन्दरं रूपमस्य ।)शोभनरूप-विशिष्टः । यथा,—

"सुन्दरं रुचिरं चारु मनोज्ञं मञ्जु मञ्जुलम् ।
कान्तं मनोरमं रुच्यं सुषमं साधु शोभनम् ॥
वल्गु हारि सुरूपाभिरूपदिव्यमनोहरम् ॥"
इति जटाधरः ॥

( यथा, बृहत्संहितायाम् । ५८ । ४० ।
"शाम्बश्च गदाहस्तःप्रद्युम्नश्चापभृत् सुरूपश्च ॥"
विद्वान् । यथा,—

"विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः
व्यक्तो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः
कविः ॥
धीमान् सूरिः कृतिः कृष्टिर्लब्धवर्णो विचक्षणः ।
प्राप्तरूपसुरूपाभिरूपदूरदृशः समाः ॥"
इति जटाधरः ॥

सुरूपा यथा । नकुलः१ पुरूरवाः २ अश्विनी-कुमारौ ३ नलकूवरौ ४ कन्दर्पः ५ शाम्बः ६ । इति कविकल्पलता ॥

सुरूपा,स्त्री,(सु शोभनं रूपं यस्याः।) शालपर्णी भार्गी । इति राजनिर्घण्टः ॥

सुरूहकः, पुं, गर्द्दभाश्वः । इति हेमचन्द्रः ॥

सुरेज्यः, पुं, ( सुराणां इज्यः । ) बृहस्पतिः । इति केचित् ॥ (यथा, बृहत्संहितायाम् । ८ । २३ ।

"विष्णुः सुरेज्यो बलभिद्धुताश-
स्त्वष्टोत्तरप्रोष्ठपदाधिपश्च ॥")

सुरेज्या, स्त्री, (सुराणामिज्या ।) तुलसी । इति राजनिर्घण्टः ॥

सुरेन्द्रः, पुं,(सुरेषु इन्द्रः ऐश्वर्य्यशाली ।) इन्द्रः । इति केचित् ॥ (यथा, भागवते ।८।७।२१ ।

"न ते गिरित्राखिललोकपाल-
विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ॥"
लोकपालः । इति मल्लिनाथः ॥ यथा, रघुः । ३ । ११ ।

"सुरेन्द्रमात्राश्रितगर्भगौरवात्
प्रयत्नमुक्तासनया गृहागतः ॥"
तथाच मनुः । ७ । ५ ।
"यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो
नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥")